हिमसंस्कृतवार्ताः

दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-41 | 1 | दिसम्बर 11, 2024 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१, कलियुगाब्दः ५१२५ हेमन्तऋतुः सूर्यदक्षिणायनम् मार्गशीर्षशुक्लैकादशी तिथिः मार्गशीर्ष २६ प्रविष्टांशः मङ्गलमयः भवेत्

2 हिमाचलप्रदेशस्य राज्यपालस्य यानसमूहे समाविष्टानि वाहनानि परस्परं संघातानि अभवन्



3 धर्मशाला-विधानसभायाः कार्यविधेः प्रथमवारं सजीवप्रसारणं दृश्यते



4 अयोध्या-निर्णयः - किमर्थं न्यायाधीशः नरिमनः न्यायस्य "प्रहसनम्" अनिवृत्य स्वं पृथक्कृतवान्?



# आन्तर्जालिकापराधाः जलवायुपरिवर्तनञ्चेति

## मानवाधिकाराय नूतने सङ्कटे जायमाने स्तः-राष्ट्रपतिः

**हिमसंस्कृतवार्ताः।** राष्ट्रपतिपदासीनया द्रौपदीमुर्मु इत्यनया मानवाधिकारदिवसावसरे समेषां सम्मानाधिकारयोः रक्षणक्षमं न्याययुक्तञ्च आंकिकीयवातावरणं भवेदिति सबलं प्रतिपादितम्। नवदिल्ल्यां राष्ट्रियमानवाधिकारायोगेन समायोजितम् मानवाधिकारदिवसकार्यक्रमं सम्बोधन्ती राष्ट्रपतिः उक्तवती यत् आन्तर्जालिकापराधाः जलवायुपरिवर्तनञ्चेति मानवाधिकाराय नूतने सङ्कटे जायमाने स्तः। तया भणितं यत् आंकिकीययुगमिदं परिवर्तनकरम् अस्ति। परमनेन आन्तर्जालिक-अपराधाः, निजतायाः हननादयः दोषाः अपि प्रकटिताः वर्तन्ते। राष्ट्रपतिना प्रोक्तं यत् भारतदेशः बुभुक्षा-निर्धनतयोः उन्मूलनेन सह युवभ्यः समानावसर-दानाय नीतौ समाचर्य विश्वफलके देदीप्यमानः उदाहरणभूतोऽस्ति।



राष्ट्रपतिना कदाचाराणां समनाय, जागृतिम् अभिवर्धनाय, मुख्यधारया विरतानां जनानाम् अधिकाररक्षणाय च नीत्यन्तरवर्तीनां पविर्तनानां सम्पादनाय राष्ट्रिय मानवाधिकार- आयोगस्य प्रशंसा कृता। अवसरेऽस्मिन् राष्ट्रपतिः द्रौपदीमुर्मुः राष्ट्रियमानवाधिकार- आयोगस्य प्रकाशन-त्रयाणामपि विमोचनं कृतवती। राष्ट्रिय मानवाधिकार-आयोगस्य कार्यकार्यध्यक्षया विजया-भारती-सयानी इत्यनया अवसरेऽस्मिन् प्रोक्तं यत् मानवाधिकारदिवसः प्रत्येकं जनस्य मौलिकाधिकाराणां सशक्तं स्मारणं कथञ्चिदपि भेदं विनैव कारयतीति। अस्मिन् अवसरे भारते संयुक्तराष्ट्रसंघस्य सदस्येन शोम्बी-शार्प इत्यनेन संयुक्तराष्ट्र-संघस्य महासचिवस्य एन्टेनियो गुटेरस् इत्यस्य सन्देशः पठितः उक्तञ्च यत् भारतदेशः चिरकालादेव मानवाधिकाराणां-सार्वभौमिकघोषणायाः सुदृढः समर्थकः अस्तीति।

**सुभाषितम्**

तैलाद् रक्षेत् जलाद् रक्षेत्,
रक्षेत् शिथिलबन्धनात्।
मूर्खहस्ते न दातव्यम्,
एवं वदति पुस्तकम्।।

हिन्दयर्थः- एक पुस्तक कहती है कि मेरी तेल से रक्षा करो, मेरी जल से रक्षा करो, मेरी शिथिल बंधन से रक्षा करो और मुझे कभी किसी मूर्ख के हाथों में मत सौंपो अन्यथा पुस्तक नष्ट हो जाती है।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्तयर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp number

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## जगदीप-धनखडइत्येनं विरुध्य विपक्षेण अविश्वास-प्रस्तावः प्रस्तुतीकृतः

राज्यसभायाः अध्यक्षं जगदीप-धनखडइत्येनं विरुध्य विपक्षेण अविश्वासप्रस्तावः प्रस्तुतीकृतः। विपक्षेण आरोपितं यत् असौ सदने पक्षपातपूर्णरीत्या कार्यं करोतीति। कांग्रेस- सांसदः जयराम रमेशः सामाजिक सञ्चार-पटले एकस्मिन् लेखे लिखितवान् यत् राज्यसभायाः अध्यक्षाय एका सूचना प्रेषिता। असौ उक्तवान् यत् इण्डिया इति समूहस्य सम्बद्धानां जनानां पार्श्वे अविश्वास प्रस्तावं विहाय प्रस्तावनाय अन्यः कोऽपि विकल्पः नासीत्। असौ कथितवान् यत् विपक्षेण संसदीयलोकतन्त्रस्य हिताय अयं पदक्षेपः उत्थापितः इति।

## पूर्व-मुख्यमन्त्री केन्द्रीयमन्त्री च एस.एम. कृष्णः दीर्घकालिक-व्याधि-कारणेन मुत्युमुपगतः

हिमसंस्कृतवार्ताः। कर्नाटकस्य द्विनवति-वर्षीयः पूर्व-मुख्यमन्त्री केन्द्रीयमन्त्री च एस.एम. कृष्णः मंगलवासरे प्रातः बेङ्गलुरुनगरे दीर्घकालिक-व्याधि-कारणेन मुत्युमुपगतः। राष्ट्रपतिः द्रौपदी मुर्मुः प्रधानमन्त्री नरेन्द्रमोदी च नेतुः निधनमभिक्ष्यः शोकं-व्यक्तीकृतवन्तौ। अस्य अन्तिमसंस्कारः अद्य तस्य गृहनगरे मद्दरे सोमनहल्ली इत्यत्र भविष्यति। इतः प्राक् बेङ्गलुरुनगरे तस्य निवासस्थाने नेतारम् अन्तिमश्रद्धाञ्जलिं प्रदत्तेभ्यः जनेभ्यः व्यवस्था कृतास्ति।

## संसदि सद्स्याः शिष्टाचारस्य पालनं कुर्युः येन

### संसदप्रक्रिया सम्यक्तया चलेत्- लोकसभाध्यक्षः ओमबिरला



**हिमसंस्कृतवार्ताः।** संसदः द्वयो सदनयोः गतिरोधः गतदिने अपि प्रचलितः, येन कारणेन लोकसभा-राज्यसभयोः कार्यजातम् आदिवसं यावत् स्थगितम्। अस्य सप्ताहस्य अयं द्वितीयो दिवसः आसीत्, यः पक्ष- विपक्षयोः मध्ये आरोप-प्रत्यारोपैः परिपूर्णः आसीत्। लोकसभायाम् गतप्रातः यदा सदनस्य कार्यजातं प्रारब्धम्, तदा अध्यक्षः ओम् बिरलाः विपक्षि-सदस्यान् प्रति गतिरोधाचरणाय च अप्रसन्नतां व्यक्तीकृतवान्। असौ उक्तवान् यत् सर्वे सदस्याः सदने शिष्टाचारयुताः स्युः अथ देशस्य जनानाम् आकाङ्क्षापूर्ति-दिशि कार्यरताश्च भवेयुरिति। कोलाहलमध्ये अध्यक्षेण सदनस्य कार्यजातं मध्याह्नद्वादशवादनं यावत् स्थगितम्, अनन्तरं पीठासीनाधिकारिणा सदनस्य कार्यजातम् आदिवसं यावत् स्थगितम्। इतः प्राक् राज्यसभया कर्नाटकस्य पूर्व-मुख्यमन्त्रिणे पूर्व-विदेशमन्त्रिणे च एस. एम. कृष्णाय श्रद्धाञ्जलिः समर्पिता।

**संसदः सुचारुरूपेण कार्यजातानां सुसम्पादनमभिलक्ष्य स्वमतम् अस्थापयत् संसदीयकार्यमन्त्री किरेन रिजिजू**

संसदीयकार्यमन्त्री किरेन रिजिजू इत्येषः संसदः सुचारुरूपेण कार्यजातानां सुसम्पादनमभिलक्ष्य स्वमतम् अस्थापयत्। तेन चर्चासु अवधानाय सांसदाः सविनयं समाहूताः। तेनोक्तं यत् समाजवादीपार्टीतिदलम् तृणमूलकांग्रेसदलम्, कांग्रेसदलसहितं च विभिन्नानां दलानां सांसदैः सह सार्थक-विचारविनिमयस्य इच्छा प्रकटिताऽस्ति । तेन लाभकारिणः संसद-सत्रस्य सुनिश्चयाय प्रशासनस्य वचनबद्धता आग्रेडिता। तेन सर्वाणि विपक्षीयदलानि प्रति सहयोगाय अभ्यर्थना कृता।

## रक्षामन्त्री राजनाथसिंहः मॉस्को-नगरे सोवियत-सैनिकानां सम्मानाय

### अज्ञातसैनिकानां समाधिं प्रति गत्वा श्रद्धासुमनानि समर्पयत्

हिमसंस्कृतवार्ताः। रक्षामन्त्री राजनाथसिंहः गतदिने मॉस्को-नगरे द्वितीयविश्वयुद्धावसरे वीरगतिं प्राप्तवतां सोवियतसैनिकानां सम्मानाय अज्ञातसैनिकानां समाधिं प्रति गत्वा श्रद्धासुमनानि समर्पयत्। सहयोगाधारितस्य श्रीसिंहः रुसदेशस्य रक्षामन्त्रिणा आन्द्रेई बोलोसोव इत्यनेन सह सेना अथ सैन्याभियान्त्रिकी इत्यस्योपरि भारत-रूस-अन्तस्सर्वकारीय-आयोगस्य एकविंशतितमोपवेशनस्यापि सहाध्यक्षतां विदधाति । उभावपि नेतारौ उभयोर्देशयोर्मध्ये रक्षाक्षेत्रीय-बहुविध-श्रृंखलायाः समीक्षां विधास्यतः। यस्यां सेनातः सेना इत्यनेनसह औद्योगिक-सहयोगमपि युक्तमस्ति। रक्षामन्त्री राजनाथसिंहः रविवासरतः रुसदेशस्य त्रिदिवसीययात्रायामस्ति।

# हिमाचलप्रदेशस्य राज्यपालस्य यानसमूहे समाविष्टानि वाहनानि परस्परं संघातानि अभवन्



## उत्तरप्रदेशस्य लखनऊ-नगरे एका दुर्घटना अभवत्

हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः। मंगलवासरे हिमाचलप्रदेशस्य राज्यपालस्य यानसमूहे समाविष्टाणि वाहनानि लखनऊनगरे परस्परं संघातानि अभवन्। तस्य कर्मचारिणः दुर्घटनायां घातिताः अभवन्। शहीदमार्गे स्थितस्य लुलुमॉलस्य समीपे एव दुर्घटना अभवत्। प्रातः ८:१० वादने राज्यपालः लखनऊ-विमानस्थानकात् शहीदमार्गं प्रति प्रस्थितवान्। मार्गे सहसा तस्य यानसमूहानां कतिपयानि यानानि परस्परं संघातं कृतवन्तः। राज्यपालः एकस्मिन् कार्यक्रमे भागं ग्रहीतुम् आगच्छति स्म। विमानस्थानकात् सः मार्गेण शहीदमार्गं भूत्वा गच्छति स्म। इदानीं लुलुमॉलसमीपे यानसमूहस्य अनेकानि वाहनानि सहसा परस्परं संघातिताः अभवन्।

अस्यां दुर्घटनायां पुलिसकर्मचारिणः सहिताः केचन कर्मचारिणः घातिताः। यानसमूहस्य पुरतः स्थितेन वाहनेन सहसा रोधिनी (ब्रेक) प्रयुक्ता इति कथ्यते, यस्मात् कारणात् दुर्घटना अभवत्। दुर्घटनायां राज्यपालः सुरक्षितः अस्ति। दुर्घटनायाः कारणस्य अन्वेषणं पुलिसैः क्रियते। दुर्घटनापश्चात् सुरक्षाधिकारिणां कार्यशैल्याः विषये प्रश्नाः उत्पद्यन्ते। येषां पुलिसानां प्रमादः प्रकाशं प्राप्नोति तेषां विरुद्धं कार्यविधिः भविष्यति इति विश्वासः अस्ति। एसीपी गाजीपुरम् अपि समूहे अन्तर्भूतम् आसीत्। सः अपि क्षतिग्रस्तः अस्ति। सः अन्येन वाहनेन प्रेषितः। दुर्घटनाकारणात् शहीदमार्गे सम्मर्दः अभवत्। सम्मर्दस्य कारणेन जनाः समस्यानां सम्मुखीकरणम् अकुर्वन्।

# मण्डीजनपदस्य नगरनिगमे अनुसूचितजातिक्षेत्रेषु मार्गाः निर्मीयन्ते, दीपस्तम्भाः स्थाप्यन्ते

**हिमसंस्कृतवार्ताः:- डॉ पद्मनाभः, मण्डी।**

नगरनिगमे अनुसूचितजातेः क्षेत्रेषु १.१३ कोटि- रूप्यकाणां व्ययेन विकासकार्याणि क्रियन्ते। भग्नानां मार्गाणां पुनर्निर्माणम् करिष्यते, नूतनमार्गाः अपि निर्मीयन्ते। तत्र च विविधेषु स्थलेषु दीपस्तम्भाः स्थाप्यन्ते। नगर-निगमेन जातीयसंख्यायाः आधारं कृत्वा क्षेत्रेषु बजट वितरितम्। अत्यधिकं वित्तं सुहड़ाक्षेत्राय द्वाभ्याम् अंशाभ्यां १५.५६ लक्षरूप्यकाणि प्रदत्तानि। बैहनाक्षेत्राय १३.९७ लक्षं, दोहन्दीवार्डाय १२.७४ लक्षरुप्यकाणि, खलियार वार्डाय च ११.७१ लक्षरूप्यकाणि प्रदत्तानि। न्यूनतमं वित्तम् उपमहापौर- माधूरी-कपूरायै वार्ड-भगवाहनाय ९८५३२ रूप्यकाणि तथा महापौर-वीरेन्द्र-भट्टस्य वार्ड-पुरानीमण्डी इत्यस्मै २.२० लक्षं रूप्यकाणि विकासकार्याय प्रदत्तानि। वितरितेन बजटेन अनुसूचित- बस्तिषु विकासकार्येषु वेगः आगच्छति। नगरनिगमस्य आयुक्तेन एच. एस. राणा इत्यनेन उक्तम् यत् बजटं सर्वेषु वार्डेषु जनसंख्यानुसारं वितरितम्। द्वे अंशे अपि विमोचिते।

## द्वादशे दिनाङ्के निगमसभायाः गोष्ठी भविष्यति-

नगरनिगमस्य साधारणसभा द्वादशे दिसम्बरमासे महापौरस्य वीरेन्द्रभट्टस्य अध्यक्षतायां निगम- कार्यालये गोष्ठीकक्षे भविष्यति। आयुक्तेन एचएस राणा इत्यनेन सर्वे पार्षदाः पत्रद्वारा सूचिताः। पार्षदाः तेषां वार्डेषु सम्बद्धेषु मदेषु कार्येषु च विवरणं एकादशदिसम्बरपर्यन्तं समर्पयिष्यन्ति यथा सभायां तेषु चर्चा क्रियते।

# हिमाचलप्रदेशे अवैधं, गुणवत्ताहीनं, विषाक्तं च मद्यं यदि गृहीतम्, तर्हि पञ्चवर्षाणि यावत् कारावासः



**हिमसंस्कृतवार्ताः डॉ पद्मनाभः, शिमला।**

राज्यपालस्य अनुमोदनं प्राप्य विधिविभागेन हिमाचलप्रदेश- आबकारी- संशोधनविधेयकः-२०२४, विधेयकसंख्याङ्कः १६, राजपत्रे अधिसूचितः । इदानीं संशोधितविधेयकस्य अनुसारम् अवैधं, गुणवत्ताहीनं, विषाक्तं च मद्यं गृहीते पञ्चवर्षपर्यन्तं कारावासः, पञ्चलक्षरुप्यकपर्यन्तं दण्डश्च भविष्यति। जिलाधिकारीभ्यः अपराधनिवारणाय अधिकाराः प्रदत्ताः। आरोपिणः सह आदान-प्रदानं कुर्वन्तः अपि निरीक्ष्यन्ते। विधेयकस्य व्यवस्थायाम्, आबकारीविभागे सेकण्डमेन्ट- आधारेण कमाण्डोबलं नियुक्तं भविष्यति। मद्यनिर्माणं, उत्पादनम्, आयातं, निर्यातं, परिवहनं च कुर्वन्तः सर्वे अपि अस्मिन्नेव विधेयकेन अनुबद्धाः भवन्ति। मद्यनिर्माणाय प्रयुक्तं किमपि उपकरणं, सामग्री, अथवा भट्टी च यदि गृहीता, तर्हि अपराधः त्रिवर्षादारभ्य पञ्चवर्षपर्यन्तं कारावासः, पञ्चलक्षरुप्यकपर्यन्तं दण्डश्च दास्यते।

## संशोधनविधेयकेन एषः अपराधः संज्ञेयः तथा गम्भीरः अपराधः घोषितः

आपराधिक-प्रक्रिया-संहितायाम् (सीआरपीसी) उक्तं यत् संज्ञेयापराधः सः, यत्र (वारंट) अनुज्ञापत्रम् विना अपि बन्दीग्रहणस्य (गिरफ्तारी) जालसञ्चिका भवति। तादृशम् अपराधं प्रतिभूतिरहितं कृतम्। प्रथमतः एषु अपराधेषु कठोरः नियमः नासीत्, किन्तु इदानीं सम्पत्तिग्रहणस्य दण्डवृद्धेश्च प्रावधानं कृतम्।

# Deputy CM: केन्द्रीयमंत्रिणः जलजीवनमिशनस्य अवशिष्टांशं प्रार्थितम्



## उपमुख्यमन्त्री मुकेश अग्निहोत्री जलशक्तिमन्त्रिणा सी. आर. पाटिलेन दिल्लीनगरे मिलितवान्

**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।**

दिल्लीनगरे उपमुख्यमन्त्री मुकेश अग्निहोत्री केन्द्रीयजलशक्तिमन्त्रिणा सी. आर. पाटिलेन मिलितवान्। अस्मिन् काले सः हिमाचलसम्बद्धविषयेषु स्वमतानि प्रस्तुतवान्। जलजीवनमिशनस्य अन्तर्गतं हिमाचलप्रदेशस्य अवशिष्टांशस्य राशिः तथा फिन्नासिंहपरियोजनायाः स्वीकृतराशिं विमोचयितुम् आग्रहं कृतवान्। अस्मिन् अवसरे सः सिञ्चनयोजना-२ इत्यस्य अनुमोदने विलम्बस्य विषये अपि सूचितवान् । सः अवदत् यत् वर्तमानवित्तीयवर्षस्य कृते भारतसर्वकारेण जलजीवनमिशनस्य अन्तर्गतं ९१६.५३ कोटिरूप्यकाणि स्वीकृतानि, परन्तु अधुना यावत् केवलं १३७.४८ कोटिरूप्यकाणि एव आवंटितानि सन्ति। मुकेश अग्निहोत्री इत्यनेन जलजीवनमिशनस्य प्रथमद्वितीयांशं च मुक्तं भवेत् येन प्रचलितानां योजनानां समाप्तिः सुनिश्चिता भवति। केन्द्रीयमन्त्री सी. आर. पाटिलः आश्वासनं दत्तवान् यत् सः स्थितिविषये अवगतः अस्ति, शीघ्रमेव धनं मुक्तं भविष्यति। सः ६७ शीतकालीन-जलापूर्तियोजनानां कार्यान्वयनस्य अनुमतिविषये केन्द्रीयमन्त्रिणा समक्षं विषयं उत्थापितवान्। ५१७.१६ कोटिरूप्यकाणि (जीवन्तग्रामयोजना सहितम्) अपि चर्चां कृत्वा एतासां योजनानां अनुमोदनं कर्तुम् अनुरोधः कृतः। केन्द्रीयमन्त्री सी.आर.पाटिलः सहानुभूतिपूर्वकं विषये विचारं करिष्यामि इति आश्वासनं दत्तवान्। सीआर पाटिलेन उक्तं यत् एतासां योजनानां अनुमोदनपत्रं तत्क्षणमेव निर्गतं भविष्यति, धनस्य आबंटनम् अपि शीघ्रमेव भविष्यति।

# धारावाहिकं गीताप्रश्नोत्तरम्-८५

अर्जुनः - तेषां भोगासक्तानाम् आसुरीसम्पद्वतां मनुष्याणाम् अन्येऽपि पतनकारिणः भावाः भवेयुः वा भगवन् ?

श्रीकृष्णः - आम्, अर्जुन ! तादृशाः असुरस्वभावयुक्ताः मनुष्याः आत्मानम् इतरेषाम् अपेक्षया श्रेष्ठं मन्यन्ते । ते स्तब्धाः भवन्ति, धनमानमदादिभिः दुर्गुणैः समन्विताः भवन्ति । तेषु स्थितः एतादृशाः भावाः हि तेषां पतनस्य कारणं भवति ।

अर्जुनः - एतादृशाः दुर्वृत्ताः कदाचित् शुभकार्यमपि कर्तुं प्रभवेयुः वा भगवन् ?

श्रीकृष्णः - आम्, ते यज्ञादीनि शुभकर्माणि अपि कदाचित् कुर्वाणाः दृश्यन्ते, चेदपि स्वभावपरवशतः ते अविधिपूर्वकं, नाममात्रं, दम्भपूर्वकं, लोकप्रदर्शनाय, अभिमानाय च तत्कार्यं कुर्वन्ति ।

अर्जुनः - भगवन् ! एवं ते तत् कथं कुर्युः ?

श्रीकृष्णः - यतोहि ते स्वाभाविकतया हि कामः, क्रोधः, दर्पः, हठः, अहङ्कारः इत्यादिषु दुर्गुणेषु समाश्रिताः भवन्ति । अतः सज्जनपुरुषवत् निष्कामकर्म कर्तुं ते न प्रभवन्ति अर्जुन !

अर्जुनः - तेषु अन्यविधाः अपि भावाः उत्पद्यन्ते वा भगवन् ?

श्रीकृष्णः - आम्, तादृशाः मनुष्याः स्वशरीरे स्थितम्, अन्येषां शरीरे च स्थितं मां द्विषन्ति । मम, अन्येषाञ्च गुणानपि दोषदृष्ट्या पश्यन्ति ।

अर्जुनः - आसुरस्वभावानाम् एतादृशानां कः परिणामः भवेत् भगवन् ?

श्रीकृष्णः - पार्थ ! तान् क्रूरस्वभावान्, द्वेषयुक्तान्, अत्यन्तं नीचान्, अशुचीन् मनुष्यान् पुनरपि शुनकः, गर्दभः, व्याघ्रः, काकः, उलूकः, गृध्रः, सर्पः, वृश्चिकः इत्यादिषु आसुरीयोनिषु एव क्षिपाम्यहम् इति, शम् । (गी०- १६/१७-१९)

**(अनुवर्तिष्यते) -- नारदः ।**

## धर्मशाला- विधानसभायाः कार्यविधेः प्रथमवारं सजीवप्रसारणं दृश्यते

### *राष्ट्रिय ई-विधान-अनुप्रयोगे जनाः सुविधां प्राप्स्यन्ति- विधानसभाध्यक्षः*



**हिमसंस्कृतवार्ताः- धर्मशाला।** हिमाचलसभायाः शिशिरसत्रे हिमाचलस्य नाम्नि अन्यत् उपलब्धिः अपि योजितुं गच्छति। अस्मिन् समये जनाः सभायाः शिशिरसत्रस्य कार्यविधेः सजीवप्रसारणं द्रष्टुं शक्नुवन्ति। विधानसभाध्यक्षः कुलदीपसिंह पठानिया इत्यनेन उक्तं यत् जनाः राष्ट्रिय ई-विधान-अनुप्रयोगस्य (नेवा) माध्यमेन शिशिरसत्रस्य कार्यविधिः सजीवरूपेण द्रष्टुं शक्नुवन्ति। धर्मशालायाः तपोवने स्थिते विधानसभायां १८ दिसम्बरतः २१ दिसम्बरपर्यन्तं शिशिरसत्रस्य आयोजनं क्रियते। अधुना विधानसभायाः सर्वाः सूचनाः नेवा- अनुप्रयोगमार्गेण उपलभ्यन्ते। आशास्महे यत् एतत् नूतनं पदं सभायाः पारदर्शिता, कार्यसुलभतां च वर्धयिष्यति। देशस्य २३ भाषाः अस्मिन् अनुप्रयोगे समाविष्टाः सन्ति। अस्मिन् वर्षे (पञ्चाङ्गवर्षे २०२४) कुलम् २७ सत्राणि निर्धारितानि आसन्। वयं प्रथमे आय-व्ययके सत्रे १२ सत्राणि बजटसत्ररूपेण ११ सत्राणि च मानसूनसत्ररूपेण कृतवन्तः अधुना चत्वारि सत्राणि तपोवाने भविष्यन्ति। शिशिरसत्रस्य सज्जतायाः अन्तिमरूपेण निर्धारणस्य कार्यं प्रशासनेन, पुलिसेन च पूर्णतया प्रचलति। अस्मिन् सत्रे धर्मशालायां पैराग्लाइडिंग-क्रियाकलापानाम् उपरि प्रतिबन्धः भविष्यति। उपायुक्तः काङ्ड़ा हेमराजवैरवा कथयति यत् अधिवेशनकाले मुख्यमंत्रिणः, मन्त्रिणः, विधायकानाम्, अधिकारिणां च आवासस्य समुचितव्यवस्था क्रियते।

**प्रतिज्ञासु जीविकासु च तप्स्यते तपोवनम्**

धर्मशालायाः तपोवने १८ दिसम्बरतः आरभ्य शिशिरसत्रस्य राजनैतिकधारां तीक्ष्णां कर्तुं विपक्षः अपि व्यग्रः अस्ति। शीतकालीनसत्रस्य विधायकानां अधिकांशः प्रश्नाः अनुद्योगेषु, विधिव्यवस्था, अवैधखननं, स्थानीयविषयेषु च पृष्टाः सन्ति। काङ्ग्रेसस्य घोषणापत्रे प्रतिज्ञानां च विषये विधायकैः पृष्टेषु प्रश्नेषु भाजपाविधायकाः पृष्टवन्तः यत् कति प्रतिज्ञाः पूर्णाः अभवन्, तेषु कति जनाः लाभान्विताः इति। एतादृशे परिस्थितौ काङ्ग्रेसस्य कार्याणां, प्रतिज्ञानां च इति विषये तपोवने बहु कोलाहलः भवितुम् अर्हति इति अनुमानं कर्तुं शक्यते

## संस्कृतभारती, हरियाणा (न्यासः) द्वारा पञ्चकूलाजनपदे, सेक्टर-16, अग्रवालभवने आयोजितः गीतापाठकार्यक्रमः



संस्कृतभारती, हरियाणा (न्यासः) द्वारा पञ्चकूलाजनपदे, सेक्टर-16, अग्रवालभवने 09.12.2024 दिनाङ्के गीताजयन्ती-महोत्सवे गीतापाठकार्यक्रमः अभवत्। कार्यक्रमे संस्कृतभारत्याः हरियाणाप्रान्तस्य प्रान्तमहाविद्यालीय- कार्यप्रमुखः डॉ. सुनीलकुमारः संस्कृतभारत्याः परिचयम् अकरोत्। गीतापाठः जिलाविस्तारकः देवाँशकृष्णः कृतवान्। गीतायाः व्याख्यानं पञ्चकूलाजिला-संयोजकः डॉ. राजवीरकौशिकः कृतवान्। कार्यक्रमे रामशास्त्रीमहोदयः, संस्कृतमहाविद्यालयस्य छात्राः, सामाजिकाश्च उपस्थिताः आसन्।

## पुरीस्थे श्रीजगन्नाथसंस्कृतविश्वविद्यालये समारब्धः सेतुपाठ्यक्रमः





**हिमसंस्कृतवार्ताः-** पुरीस्थे श्रीजगन्नाथ-संस्कृतविश्वविद्यालये वृत्तिपरामर्शकेन्द्रपक्षतः आचार्य-शिक्षाशास्त्रिछात्राणां कृते सेतुपाठ्यक्रमः समारब्धः। स्नातकोत्तरपरिषदध्यक्षैः प्रो. दत्तात्रेयमूर्त्तिमहोदयैः कार्यक्रमस्योद्घाटनं कृतम्। विषयविशेषज्ञरूपेण वेदविभागाध्यक्षाः प्रो. शत्रुघ्नपाणिग्राहिमहोदयाः वेदस्य परिचयं कारितवन्तः। विश्वविद्यालयस्य कुलपतीनां प्रो. प्रसन्नस्वाईंवर्याणां मार्गदर्शनेन समारब्धः सेतुपाठ्यक्रमः, असौ दशदिनानि यावत् चलिष्यति। छात्राः साग्रहं भागग्रहणं कृतवन्तः। संस्कृतशास्त्रेषु प्रवेशार्थं पाठ्यक्रमः अयं मार्गप्रदर्शनं करिष्यतीति संयोजिका डॉ. निवेदिता करः सूचितवती।

## न्यायमूर्तिना बी. आर. गवई इत्यनेन आपदापीडितानां, आदिमजनजातीय- निर्बलसमुदायानां कृते समारब्धानां नैकविधपदक्षेपाणां चर्चा कृता



**हिमसंस्कृतवार्ताः।** सर्वोच्चन्यायालयस्य न्यायाधीशेन राष्ट्रिय-मानवाधिकार-आयोगस्य च कार्यकारी तस्कर्यादिसहित अध्यक्षभूतेन न्यायमूर्तिना बी. आर. गवई इत्यनेन आपदापीडितानां, आदिमजनजातीय- समुदायानां, रासायनिक-एसिडाख्य-पदार्थपीडितानां, निर्बलसमुदायानाञ्च कृते समारब्धानां नैकविधपदक्षेपाणां चर्चा कृता। मानवाधिकारदिवसावसरे एकस्मिन् साक्षात्कारे न्यायमूर्तिना गवई इत्यनेन हिंसापीडितेभ्यः महिलाभ्यः अनुदानदानेन सह वन्दिभ्यश्च विधिपरामर्शात्मक- सहायतार्थमपि आयोगस्य प्रयासेषु बलं दत्तम्। न्यायमूर्तिना गवई इत्यने आयोगस्य अध्यक्षरूपेण स्वकीयं दृष्टिकोणं संस्फुटयता प्रोक्तं यत् तस्य प्राथमिकता देशस्य सर्वाति दूरस्थ क्षेत्रं यावत् विधिव्यवस्थायाः प्रापणमस्तीति।

**हिमसंस्कृतवार्ताः, डॉ. विवेक शर्मा, जोगिन्द्रनगरम्**

## सामान्यज्ञानम्

प्रश्नः 1. भारते रंगनाथ**मन्दिरम्** कुत्र अस्ति?

उत्तरम् : तमिलनाडुप्रान्ते

प्रश्नः 2. '**नाट्यशास्त्रम्**' इत्यस्य रचयिता कः अस्ति?

उत्तरम् - भरत मुनिः।

प्रश्नः 3. ऑस्ट्रेलियादेशस्य राष्ट्रीयचिह्नं कः जन्तुः अस्ति?

उत्तरम्- ऑस्ट्रेलियादेशस्य राष्ट्रीयचिह्नं कङ्गारुः जन्तुः अस्ति।

प्रश्नः 4. पृथिव्याः फेफडं कं मान्यते कथ्यते वा?

उत्तरम्- पृथिव्याः फेफडं अमेज़नवर्षावनं कथ्यते।

प्रश्नः 5. 'भारतीय राष्ट्रीय कांग्रेस' दलस्य स्थापना कदा अभवत्?

उत्तरम्- 'भारतीय राष्ट्रीय कांग्रेस' दलस्य स्थापना 1885 तमे वर्षे अभवत्।



# असमराज्यस्य विश्वनाथजनपदे

## नूतना कार्यकारी समितिः निर्माणम्



**हिमसंस्कृतवार्ताः - जगदीशडाभी ।** गत सप्ताहस्य प्रथमे दिनाङ्के विश्वनाथजनपदस्य कार्यकारिणी एका सभा जाता तत्र सर्वप्रथमं प्रान्तीयसंस्कृत-सम्मेलनम्, प्रबोधनवर्गम्, धनसंग्रहम्, तथा पुर्वतनसमितेः सक्रियकर्तुं नवीनसमिति निर्माणं च जातम् । पुनश्च काचित् नगरसमितिः तथा ग्रामिणसमितिः अपि भविष्यतीति निश्चिता । ताः समित्यः इत्थं प्रकारकाः - विश्वनाथनगर समितिः, गहपुरनगर समितिः , समरदलनीग्राम समितिः, गमिरिग्राम समितिः इति । तत्र अध्यक्षपदं निर्वहति विश्वनाथ जनपद पूर्वाध्यक्षः श्रीमान् लोकनाथ शास्त्री महोदयः, तत्र मुख्यातिथि असान् ईशानक्षेत्रस्य प्रभारीमहोदय कन्नन् महोदयः अन्ये अतिथयः ईशानक्षेत्रस्य सहसङ्गठनमन्त्री श्रीमान् राजेन आचार्य, श्रीमान् प्रभूनाथ सिंहः, श्रीमान् नारद उपाध्याय, श्रीमान् तारा महन्तः, श्रीमान् कमला उपाध्याय इत्यादयः आसन्। प्रान्तसम्मेलनविषये विषदी चर्चा जाता अथ च प्रबोधनवर्गस्य विषये धनसंग्रहविषये, च राजेन महोदयः वर्णयति। नवीन समितिः विषये कन्नन् महोदयः परमर्शति यत् लघुसमितिः ग्रामस्तरे नगरस्तरे च भवेत् तेन कार्यकरणे सौविद्यं भवति। ततः नवीन समितिः चयन प्रक्रिया प्रारम्भः अभवत्। तत्र अध्यक्षरूपेण भूतपूर्व ए.सी.एस हितेश दास महोदयः, उपाध्यक्षरूपेण विनोद दवाडीमहोदयः, मन्त्री/सचिवः नारायण अधिकारी तथा च अन्ये १८ जनान् योजयित्वा नूतना समितिः जाता । अन्तिमे शान्तिमन्त्रपाठात्परं चायपानादिकं कृत्वा सभा भङ्गः जातः।

# अयोध्या-निर्णयः - किमर्थं न्यायाधीशः नरिमनः न्यायस्य "प्रहसनम्" अनिवृत्य स्वं पृथक्कृतवान्?



स्वराज्यमैग् इत्यस्मिन् लिखितस्य लेखस्य
ईदराधीरजेन कृतः लेखानुवादः

सर्वोच्चन्यायालयेन ऊनविंशत्युत्तरविंशतिशत-तमे वर्षे अयोध्या-विवाद-विषये दत्तः निर्णयस्य विरोधे सद्यः उक्तवान् सेवानिवृत्तः न्यायाधीशः नरिमनः न्यायपीठस्य सदस्यरूपेण निर्णयं प्रभावयितुम् अवसरं प्राप्तवान् किन्तु श्रवणात् स्वं पृथक्कृतवान्।

नवढिल्लिकायां सञ्जाते कस्मिंश्चित् समारोहे पूर्वतनः सर्वोच्चन्यायालयीयः न्यायाधीशः सर्वोच्चन्यायालयीयस्य न्यायाधीश-पञ्चक-पीठेन तद्विषये दत्तं निर्णयं "परिभ्रमं सहस्रपृष्ठयुक्तं निर्णयम्" कथितवान्।

तेन उल्लेखितं यत् सर्वोच्चन्यायालयः भारतीय-पुरातत्व-सर्वेक्षणस्य वृत्तान्तानाम् अनुसारेण कथितवान् यत् अयोध्यायां भवनस्य अधः भवनं तु "शिवालयः" आसीत् अपिच सद्यस्काः स्तराः हिन्दुमन्दिरम् अनावृतवन्तः। किन्तु तेन प्रतिपादितं यत् सर्वोच्चन्यायालयेन न कथितं यत् भवनस्य अधः "रामालयः" आसित् इति। तस्य अनुसारेण अयं मुख्यः विषयः। किन्तु तस्य कथनात् लुप्तं यत् इस्लामीयं भवनं हिन्दुभवनस्य उपरि निर्मितमिति प्रमाणितम्।

सः इतोऽपि कथितवान् - "अन्यत् अतिमहत्त्वपूर्णं तथ्यम् अस्ति यत् अस्मिन् कार्यकलापे [अयोध्याविषये सर्वोच्चन्यायालयीये अधिनिर्णये] प्रतिवारम् उक्तं यत् हिन्दुपक्षेन एव न्यायावस्थां विरुध्य व्यवहारः कृतः..."

"...अथ न्यायस्य महत्[मम मत्यनुसारि] प्रहसनं सञ्जातम् यत् धर्मनिरपेक्षतायै महत्त्वं न दत्तम्।"

अनन्तरं सर्वोच्चन्यायालय-निर्णयेन उपासना-स्थल-अधिनियम-विषये कथने नरिमनः किञ्चित् संभाष्य "सहिष्णुतायाः" आग्रहं कृतवान्। एकहोरां यावत् सञ्जाते तस्य भाषणे नरिमनः रामजन्मभूमी-अभियोगस्य विषये निर्णये च विंशति-निमेषान् यावत् उक्तवान्। किन्तु यदा सः सेवारतः नरिमनः स्वयम् अवसरं प्राप्तवान् इदं "प्रहसनं" निर्वारयितुम्। चतुर्दशोत्तरविंशतिशततमे वर्षे सर्वोच्चन्यायालये नियुक्तः नरिमनः एकविंशत्युत्तरविंशतिशततमं वर्षं पर्यन्तं सेवारतः। अस्मिन् काले नरिमनः अयोध्या-विवादं सम्बन्ध्य कस्मिन् अपि विषये श्रवणात् स्वं पृथक्कृतवान्। निर्णयं दत्तवतः, मुख्यन्यायाधीशेन गोगोइ-वर्येण निर्मितात् नीतात् न्यायाधीश-पञ्चक-पीठात् अपि स्वं पृथक्कृतवान् नरिमनः। यदि नरिमनः पीठे भागं भजितवान् तर्हि स्वेन अद्यत्वे उक्तं "प्रहसनं" निवारयितुम् वा निन्दयितुं वा विरोधयितुं वा अशक्ष्यत्। ऊनविंशत्युत्तरविंशतिशत-तमे वर्षे अन्तिमनिर्णयं दत्तवति पञ्चक-पीठे स्वभागं गृहीतवान् चेत् सः बहुमतस्य विरोधम् अकरिष्यत्। तद्विरोधः एव वार्ताविषयकः भूत्वा, निर्णयं विलम्बयितुं मुख्यन्यायाधीशं विवश्यकरिष्यत्। भारतीये इतिहासे ईदृशे महत्त्वपूर्णे अभियोगे सर्वोच्चन्यायालयः विभाजितमतं प्रस्तुतीकर्तुं न अर्हति इति कारणम् अभविष्यत्। निर्णयः एकमत्येन कृतः। निर्णयस्य लेखकः पञ्चासु कः इति न ज्ञातम्। एषां तर्काणाम् अनुसारेण न्यायाधीशः नरिमनः अयोध्या-अभियोगं प्रभावयितुं शक्तः इति स्पष्टम्। किन्तु सः स्वं पृथक्कृतवान्। अधुना पञ्चभ्यः वर्षेभ्यः परं स्वविरोधं प्रकटयति।

प्रश्नः अस्ति - किमर्थं सः स्वं पृथक्कृतवान्?

## " लौकिकन्यायकोशः " ( ११३ )
## " वीचितरङ्गन्यायः "

वीचिः नाम तरङ्ग एव " भङ्गः तरङ्ग उर्मिर्वा स्त्रियाँ वीचिः " इत्यमरकोशे वीचिशब्दः तरङ्गपर्यायत्वेन दर्शितः। तथापि तयोः कश्चन भेदः अस्ति। तरङ्गः वीचेः अपेक्षया लघुः भवति। तरङ्गानाम् एव क्षोभतः वीचिः उत्पद्यते। एवं काचन शृंखला निर्मियते। एवं शब्दस्य अपि उत्पत्तिः एकस्मात् शब्दात् शब्दान्तरम् इति क्रमेण भवति इति भावः। वीचितरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता।

डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्

## "बादशाह पतिसंरक्षणम् " नामकं अभियानं चालयेत्

हास्यकणिका विशेषज्ञा- विदुषी अग्रवाल
प्रेरणास्रोतः- महाभागः महेन्द्रमिश्रमहोदयः




लोके पति-पत्नीविषये हास्यकाणिका सर्वप्रिया मनोरंजिका च अस्ति

---------------------

अस्वीकरणम्- (Disclaimer) अस्ति एषा हास्यकणिका केवलं मनोरंजनार्थम् अस्ति, कस्यचित् व्यक्तिगतजीवनेन सह कोऽपि सम्बन्धः नास्ति।

हिंदीभाषायाः कक्षा आसीत्। शिक्षिका उदासीनाऽसीत्। पत्या सह युद्धं कृत्वा आगता आसीत्।

छात्राः उक्तवन्तः:- "महोदये! अद्य किम् पाठयिष्यति"?

शिक्षिका उक्तवती- क्रोधं मा आनय। अधुना सर्वे पतिविषये निबन्धं लिखन्तु।

पतिविषयं श्रुत्वा सर्वे बालकाः भयभीताः अभवन्।

एकः चतुरः छात्रः भीत्वा किञ्चित् लिखित्वा दर्शयति।

१. पतिः एकः गृहस्थः प्राणी अस्ति।

२. एषः सर्वेषां गृहे प्रायः लभ्यते।

३. एतान् पालयितुं पूर्णतया अधिकारं पत्नीपदेन सम्मानिता महिलां प्राप्नोति।

४. तस्य द्वे नेत्रे स्तः, येन सः मौनं भूत्वा इति पश्यति।

५. तस्य द्वौ कर्णौ अपि स्तः। याभ्यां केवलं भार्यायाः तर्जनं श्रृणोति।

६. तस्य एकः मुखः अस्ति। तस्य उद्घाटनाय प्रतिबंधः अस्ति।

७. तस्य एका एव नासिका अस्ति।

**पत्युः द्वौ प्रकारौ स्तः-**

**१. जोरू का गुलाम-** एषा प्रजातिः अस्माकम् देशे बाहुल्येन प्राप्यते।

**२. जोरू के बादशाह-** एषा प्रजातिः शनैः शनैः विलुप्यते।

अतः सर्वकारः यथाशीघ्रं तस्य संरक्षणार्थं "बादशाह पतिसंरक्षणम्" इति अभियानं चालयेत्। एतां प्रार्थनां सर्वे पतयः कुर्वन्ति।

## श्रीसिद्धबलीमन्दिरे स्वच्छताभियानं स्वयंसेवकैः सञ्चालितम्




कुलदीपमैन्दोला।कोटद्वारं। "स्वच्छता सर्वधनं स्वच्छता सर्वरोगहरम्। स्वच्छता सर्वहितं स्वच्छता सर्वलक्षणम्।" अनया भावनया ग्रीन-आर्मी देवभूमिः उत्तराखण्डः तथा मेहरबानसिंहकण्डारी सरस्वतीविद्यामन्दिर-इण्टर- कॉलेज- कोटद्वारम्, रितेशशर्मा सरस्वतीविद्यामन्दिर-इण्टर-कॉलेज-जानकीनगरम् कोटद्वारम् च, एनएसएस (NSS) इत्येतैषां स्वयंसेवकैः संयुक्तप्रयासेन श्रीसिद्धबलीबाबामन्दिरे अनुष्ठानस्य स्वच्छतापूर्वकं महास्वच्छता अभियानं आयोजितं। अस्मिन् अभियाने स्वयंसेवकैः श्रीसिद्धबलीमन्दिरप्राङ्गणे, नवदुर्गामन्दिरे, श्रीफलाहारीबाबामन्दिरे, श्रीसिद्धबलीविहारस्थले च वृहद् स्वच्छता अभियानं कृतम्। अस्मिन् स्वच्छताभियाने कोटद्वारनगरनिगमतः, श्रीमती किरणनेगी, श्रीमती अनुराधा मैन्दोला, श्री योगेशजोशी च तथा तेषां पूर्णसहयोगः लब्धः अस्मिन् कर्मणि स्वयंसेवकैः प्रचलिते सर्वे भक्तजनाः, आगन्तुकाः च तेषां प्रशंसां कृतवन्तः। श्रीसिद्धबलीमन्दिरसमितिकोटद्वारद्वारा समस्तस्वयंसेवकानां कृते जलपानस्य व्यवस्था अपि कृता।स्वच्छताकार्यक्रमे श्रीमती अनुराधा मैन्दोला (कर्मचारीपरिचारिका), श्री योगेशजोशी (ग्रीनप्लस), NSS. इत्यस्य प्रभारी श्री मनीषमधवालः, श्री अमितसिंहः (गणितप्रवक्ता), श्री राजनसिंहः (NSS. प्रभारी), ग्रीन-आर्मी-देवभूमि-अध्यक्षः शिवमनेगी, कोषाध्यक्षः उत्कर्षः नेगी, माध्यमप्रभारी सौरभधूलिया, संदीपसिंहरावतः, राकेशः, अमितसिंहरावतः, सर्तेद्रसिंहगुसाईं, अंकितः थपलियालः च अन्ये च स्वयंसेवकाः उपस्थिताः आसन्। एषः स्वच्छताकार्यक्रमः सफलतया सम्पन्नः।